# लगध ऋग्वेदवेदाङ्गज्योतिष

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः १
प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः २
ज्योतिषामयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः
विप्राणां सम्मतं लोके यज्ञकालार्थसिद्धये ३
निरेकं द्वादशार्धाब्दं द्विगुणं गतसंज्ञिकम्
षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ४
स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ
स्यात्तदादि युगं माघस्तपः शुक्लोऽयनं ह्युदक् ५
प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक्
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा ६
घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ
दक्षिणे तौ विपर्यासः षण्मुहूर्त्ययनेन तु ७
द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोदशम्
चतुर्थं दशमं च द्विर्युग्माद्यं बहुलेऽप्यृतौ ८
वसुस्त्वष्टा भवोऽजश्च मित्रः सर्पाश्विनौ जलम्
धाता कश्चायनाद्याश्चार्धपञ्चमभस्त्वृतुः ९
भांशाः स्युरष्टकाः कार्याः पक्षद्वादशकोद्गताः
एकादशगुणश्चोनः शुक्लेऽर्धं चैन्दवा यदि १०
कार्या भांशाष्टकस्थाने कला एकान्नविंशतिः
ऊनस्थाने त्रिसप्ततिमुद्वपेदूनसंमिताः ११
त्र्यंशो भशेषो दिवसांशभागश्चतुर्दशश्चाप्यनीय भिन्नम्
भार्धेऽधिके चापि गते परोऽशो द्वावुत्तमैकं प्रवकैरवेद्यम् १२
पक्षात्पञ्चदशाच्चोर्ध्वं तद्भुक्तमिति निर्दिशेत्

नवभिस्तूद्गतोंऽशः स्यादूनांशद्व्यधिकेन तु १३
जौ द्रा घः खे श्वेऽही रो षा चिन्मू ष ग्यः सू मा धा गाः
रे मृ घ्राः स्वाऽपोऽजः कृ ष्यो ह ज्ये ष्ठा इत्तृक्षा लिङ्गैः १४
जावाद्यंशैः समं विद्यात्पूर्वार्धे पर्वसूत्तरे
भादानं स्यात् चतुर्दश्यां काष्ठानां देविना कलाः १५
कला दश सविंशा स्यात् द्वे मुहूर्तस्य नाडिके
द्युत्रिंशत्तत्कलानां तु षट्छती त्र्यधिकं भवेत् १६
नाडिके द्वे मुहूर्तस्तु पञ्चाशत्पलमाढकम्
आढकात्कुम्भको द्रोणः कुटपैर्वर्धते त्रिभिः १७
ससप्तकं भयुक्सोमः सूर्यो द्यूनि त्रयोदश
नवभानि च पञ्चाह्नः काष्ठाः पञ्चाक्षराः स्मृताः १८
श्रविष्ठायां गणाभ्यस्तान्प्राग्विलग्नान्विनिर्दिशेत्
स्तर्यान्मासान् षडभ्यस्तान्विद्याच्चान्द्रमसानृतुन् १९
अतीतपर्वभागेभ्यः शोधयेद्द्विगुणां तिथिम्
तेषु मण्डलभागेषु तिथिनिष्ठांगतो रविः २०
याः पर्वभादानकलास्तासु सप्तगुणां तिथिम्
प्रक्षिपेत्तत्समूहस्तु विद्यादादानिकीः कलाः २१
यदुत्तरस्यायनतो गतं स्याच्छेषं तु यद्दक्षिणतोऽयनस्य
तदेकषष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणम् २२
यदर्धं दिनभागानां सदा पर्वणि पर्वणि
ऋतुशेषं तु तद्विद्यात्संख्याय सहपर्वणाम् २३
इत्युपायसमुद्देशो भूयोऽप्यह्नः प्रकल्पयेत्
ज्ञेयराशिगताभ्यस्तं विभजेत् ज्ञानराशिना २४
अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः
सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च २५
सविता त्वष्टाथ वायुश्चेन्द्राग्नी मित्र एव च

इन्द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च  २६
विष्णुर्वसवो वरुणोऽज एकपात्तथैव च
अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च  २७
नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि
यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतम्  २८
इत्येवं मासवर्षाणां मुहूर्तोदयपर्वणाम्
दिनर्त्वयनमासाङ्गं व्याख्यानं लगधोऽब्रवीत्  २९
सोमसूर्यस्तृचरितं लोकं लोके च सम्मतिम्
सोमसूर्यस्तृचरितं विद्वान्वेदविदश्नुते  ३०
विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणम्
यल्लब्धं तानि पर्वाणि तथार्धं सा तिथिर्भवेत्  ३१
माघशुक्लप्रवृत्तस्य पौषकृष्णसमापिनः
युगस्य पञ्चवर्षस्य कालज्ञानं प्रचक्षते  ३२
तृतीयां नवमीं चैव पौर्णमासीमथासिते
षष्ठीं च विषुवान्प्रोक्तो द्वादशीं च समं भवेत्  ३३
चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दिनमुपैति चन्द्रमाः
माघशुक्लाह्निको युङ्क्ते श्रविष्ठायां च वार्षिकीम्  ३४
यथा शिखा मयूराणां नागानां मणयो यथा
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम्  ३५